कठिनांशको समास—तेषां क्रियाः तत्क्रियाः, तासु । तरतमस्य भावः तारतम्यम् । १३ ।

ते हि द्विधा शुद्धमिश्रभेदान्मिश्रास्त्रिधा पुनः । १४ ।
प्रवाहादिविभेदेन भगवत्कार्यसिद्धये ।
पुष्ट्या विमिश्राः सर्वज्ञाः प्रवाहेण क्रियारताः । १५ ।
मर्यादया गुणज्ञास्ते शुद्धाः प्रेम्णाऽतिदुर्लभाः ।

अन्वय—ते हि शुद्धमिश्रभेदात् द्विधा, पुनः भगवत्कार्यसिद्धये मिश्राः प्रवाहादिविभेदेन त्रिधा (सन्ति), पुष्ट्या विमिश्राः सर्वज्ञाः (भवन्ति), प्रवाहेण विमिश्राः क्रियारताः (भवन्ति) मर्यादया (विमिश्राः) गुणज्ञाः (भवन्ति) (किंच) प्रेम्णा शुद्धाः ते अति दुर्लभाः (भवन्ति) ।

भावार्थ—वे पुष्टिमार्गीय जीव शुद्ध और मिश्र भेदसों दो

प्रकारके हैं, फिर उनमेंभी भगवानके रमणरूपकार्यकी सिद्धिके लिये मिश्रजीव, प्रवाहादि तीनभेदकरकें तीनप्रकारके हैं, अर्थात् प्रवाहमिश्र मर्यादामिश्र और पुष्टिमिश्र ऐसें तीन प्रकारके हैं, जो पुष्टिजीव थोडे अनुग्रहसूं और मिश्र हौंय हैं, अर्थात् मिले हैं वे सर्वज्ञ हौंय हैं, जो प्रवाहसूं मिश्र हौंय हैं वे कर्ममें प्रीतिवारे हौंय हैं, जोमर्यादासूं मिश्र हौंय हैं वे भगवद्गुणादिके जानवेवारे हौंय हैं, और जो पुष्टिजीव प्रेमसूं शुद्ध हौंयहैं वे तो अतिदुर्लभ हैं, इन्हीं चारभेदनकूं ग्रन्थान्तरमें पुष्टिपुष्टभक्त प्रवाहपुष्टभक्त मर्यादापुष्टभक्त और शुद्धपुष्टभक्त कहे हैं।

कठिनांशको समास—शुद्धाश्च मिश्राश्च शुद्धमिश्राः, तेषां भेदः तत्त्वात्। प्रवाहः आदिः येषां ते: प्रवाहादयः, तेषां विभेदः, तेन। १४-१५।

एवं सर्गस्तु तेषां हि फलं त्वत्र निरूप्यते। १६।
भगवानेव हि फलं स यथाऽऽविर्भवेद्भुवि।
गुणस्वरूपभेदेन तथा तेषां फलं भवेत्। १७।

अन्वय—एवं तेषां सर्गः तु (निरूपितं), अत्र फलं तु निरूप्यते, हि भगवान् एव फलं, सः भुवि गुणस्वरूपभेदेन यथा आविर्भवेत्, तथा तेषां फलं भवेत्।

भावार्थ—या प्रकारसूं उनपुष्टिजीवनकी उत्पत्ति तो कही, अब यहां उनके फलकोभी निरूपण करें हैं, निश्चयकरकें भगवान् ही फल हैं, वे श्रीकृष्ण, भक्तके हृदयमें अथवा वृन्दावनादिस्थलमें ऐश्वर्यादि गुण और नृसिंहवामनादिस्वरूपके भेदसूं जारीतिकरकें प्रगट होंयँ, वाहीरीतिसों उनके फल होंय हैं।

कठि० समास—गुणाश्च स्वरूपाणि च गुणस्वरूपाणि, तेषां भेदः तेन। १६-१७।

आसक्तौ भगवानेव शापं दापयति क्वचित् ।
अहंकारेऽथवा लोके तन्मार्गस्थापनाय हि । १८ ।

अन्वय—आसक्तौ अथवा अहंकारे, लोके तन्मार्गस्थापनाय क्वचित् भगवान् एव शापं दापयति ।

भावार्थ—नलकूवरादिकीतरह यदि लौकिकमें आसक्ति होय अथवा चित्रकेतुप्रभृतिकीतरह जो अहंकार होय तो अपने भक्तनकूं अपने २ मर्यादाआदिमार्गनमें राखवेके लिये कोईसमय भगवानही कोईकेद्वारा उन्हे शाप दिवावें हैं ।

कठि० समास—तेषां मार्गाः तन्मार्गाः, तेषु स्थापनं तन्मार्गस्थापनं तस्मै । १८ ।

न ते पाषण्डतां यान्ति नच रोगाद्युपद्रवाः ।
महानुभावाः प्रायेण शास्त्रं शुद्धत्वहेतवे । १९ ।

अन्वय—ते पाषण्डतां न यान्ति, च (तेषां) रोगाद्युपद्रवाः न (भवन्ति), प्रायेण (ते) महानुभावाः (भवन्ति), (तेषां) शास्त्रं शुद्धत्वहेतवे (भवति) ।

भावार्थ—जिनकों भगवान् शापदिवावें हैं वे भक्त, फिर लोकवेदभक्तिमार्गसूं विरुद्ध नहीं होंय हैं, तथा उनके रोगादि उपद्रवभी नहीं होंय हैं, वहोतकरकें वे महानुभाव होंय जाँय हैं, उनकूं जो भगवान् शापरूप शिक्षा दें हैं सो केवल उनको मिश्रभाव मिटायकें शुद्धप्रेमी करवेकेलियेही समझनों ।

कठि० समास—शुद्धस्यभावः शुद्धत्वं, शुद्धत्वे हेतुः शुद्धत्वहेतुः, तस्मै । १९ ।

भगवत्तारतम्येन तारतम्यं भजन्ति हि ।

अन्वय—भगवत्तारतम्येन (ते) हि तारतम्यं भजन्ति ।

भावार्थ—'यदेकमव्यक्तमनन्तरूपं' या श्रुतिसों मालुम पडै है के भगवान् अनेकरूपवारेभी हैं तासों भगवान् जेसे जेसे स्वरूपभेदको स्वीकार करे हैं, उनके भक्तभी वैसे २ भावके तारतम्यकों ग्रहण करें हैं, याहीसों वृत्रासुरको भाव संकर्षणमें भयो और गजेन्द्रको (इन्द्रद्युम्नको) निर्गुण परब्रह्ममें भाव भयो।

वैदिकत्वं लौकिकत्वं कापट्यात्तेषु नान्यथा। २०।
वैष्णवत्वं हि सहजं ततोऽन्यत्र विपर्ययः।

अन्वय—तेषु वैदिकत्वं (च) लौकिकत्वं कापट्यात् (अस्ति) अन्यथा न (असि) हि वैष्णवत्वं सहजं, अन्यत्र ततः विपर्ययः (अस्ति)।

भावार्थ—'कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्' इत्यादि वाक्यनके अनुसार उन भक्तनमें वैदिक कर्मनको अनुष्ठान करनो, तथा लौकिकव्यवहार चलानो, यह दोनो वात कपटसों अर्थात् लोकसंग्रहके लिये होंय हैं, कारण के उनमें स्वभावसोंही भगवद्भक्तपनो होय है, परन्तु मर्यादा जीव और लौकिक जीवनमें, यासूं विरुद्ध अर्थात् वैष्णवपनों कपटसों और वैदिकपनो स्वभावसूं तथा वैष्णवपनो कपटसूं और व्यवहारासक्ति स्वभावसों होय है। २०।

संबंधिनस्तु ये जीवाः प्रवाहस्थास्तथाऽपरे। २१।
चर्षणीशब्दवाच्यास्ते ते सर्वे सर्ववर्त्मसु।
क्षणात्सर्वत्वमायांति रुचिस्तेषां न कुत्रचित्। २२।
तेषां क्रियाऽनुसारेण सर्वत्र शकलं फलम्।

अन्वय—ये संबंधिनः जीवाः तथा (ये) प्रवाहस्थाः अपरे (जीवाः) ते तु सर्वे चर्षणीशब्दवाच्याः, ते सर्वे सर्ववर्त्मसु

क्षणात सर्वत्वं आयान्ति; तेषां रुचिः कुत्रचित् न (भवति), सर्वत्र तेषां क्रियाऽनुसारेण शकलं फलं (भवति)।

भावार्थ—जो तीनो मार्गनसूं संबंध राखवेवारे जीव हैं वे, और जो केवल प्रवाहमार्गमें आसक्तिवारे अन्य जीव हैं वे सब तौ, चर्षणी (भ्रान्त) शब्दसूं कहवे लायक हैं, वे सर्व सब-मार्गनमें क्षणमात्रमें सबमार्गनकेसे होय जांय हैं, किन्तु उनकी रुचि कोईभी मार्गमें दृढ नहीं होय है, सबमार्गनमें उन्हें, उनके कर्मनके लायक खंड २ फल मिलै है।

कठि० समास—संबंधः अस्ति येषां ते। प्रवाहे तिष्ठन्ति ते। वक्तुं योग्याः वाच्याः चर्षणीशब्देन वाच्याः, चर्षणीशब्दवाच्याः। सर्वाणि च तानि वर्त्मानिच सर्ववर्त्मानि, तेषु। २१-२२।

प्रवाहस्थान्प्रवक्ष्यामि स्वरूपांगक्रियायुतान्। २३।
जीवास्ते ह्यासुराः सर्वे 'प्रवृत्तिं चेति' वर्णिताः।
तेच द्विधा प्रकीर्त्यन्ते ह्यज्ञदुर्ज्ञविभेदतः। २४।

अन्वय—स्वरूपांगक्रियायुतान् प्रवाहस्थान् (अहं) प्रवक्ष्यामि, **'प्रवृत्तिं च'** इति वर्णिताः ते सर्वे जीवा हि आसुराः (सन्ति), च अज्ञदुर्ज्ञविभेदतः द्विधा हि प्रकीर्त्यन्ते।

भावार्थ—स्वरूप देह क्रियासूं युक्त प्रवाहमार्गीय जीवनकूं में कहूंगो, **'प्रवृत्तिं च निवृत्तिंच जना न विदुरासुरा'** इत्यादि श्लोकनसों गीताजीमें जिनको वर्णन भगवान्ने कियो है वे सब आसुर (प्रवाही) जीव हैं, और वे जीव अज्ञ और दुर्ज्ञ इन दो भेदनसों दो प्रकारके कहे हैं यह निश्चय है।

कठि० समास—अज्ञाश्च दुर्ज्ञाश्च अज्ञदुर्ज्ञाः, अज्ञदुर्ज्ञाणांविभेदः, तस्मात्। २३-२४।

दुर्ज्ञास्ते भगवत्प्रोक्ता ह्यज्ञास्ताननु ये पुनः ।
प्रवाहेऽपि समागत्य पुष्टिस्थस्तैर्न युज्यते । २५ ।
सोऽपि तैस्तत्कुले जातः कर्मणा जायते यतः ।

। इतिश्री वल्लभाचार्यविरचितः पुष्टिप्रवाहमर्यादाभेदः सम्पूर्णः ।

अन्वय—(ये) भगवत्प्रोक्ताः ते हि दुर्ज्ञाः, ये पुनः तान् अनु, ते अज्ञाः, पुष्टिस्थः प्रवाहे समागत्य अपि तैः (सह) न युज्यते, सः अपि तैः (न युज्यते), यतः कर्मणा तत्कुले जातः (अस्ति) ।

भावार्थ—जो गीतामें भगवान्‌ने कहे हैं वे जीव दुर्ज्ञ (दुष्टज्ञानवारे) हैं, और जो उन आसुरनको अनुकरण करें हैं वे अज्ञ कहे जाँय हैं, यद्यपि अज्ञ आसुरजीव, आसुर नहीं हैं, तथापि तत्कुलमें प्रसूति होयवेसूं अथवा उनको अनुकरणकरवेसूं वे आसुर कहे जाँय हैं, इन जीवनकी मुक्ति, केतो सत्संगादिसों भक्तिद्वारा होय है, अथवा तो संरम्भ भय द्वेष आदि असाधनसाधनद्वारा भगवदनुग्रहसों होय है, यह वात 'मन्येऽसुरान्भागवतांस्त्र्यधीशे' आदि वचननसों मालुम पडे है, पुष्टिजीव प्रवाहमार्गमें आयकेंभी उनके साथ मिलें नहीं हैं, और मर्यादामार्गीयभी आसुरकुलमें आयके उनके धर्मनसूं मिले नहीं हैं, कारणके कर्मसों उनके कुलमें जन्म भयो है, सोही श्रीगीताजीमें कही है के 'पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते' ।

क० समा०—न जानन्ति ते—अज्ञाः । दुष्टं ज्ञानं येषां ते दुर्ज्ञाः ।२५।

इतिश्री पुष्टिप्रवाहमर्यादाव्रजभाषा सम्पूर्णा.

॥ श्रीहरिः ॥

व्रजभाषामें.

सिद्धान्तरहस्यकी टीका।

श्रावणस्याऽमले पक्ष एकादश्यां महानिशि ।
साक्षाद्भगवता प्रोक्तं तदक्षरश उच्यते । १ ।

अन्वय—श्रावणस्य अमले पक्षे एकादश्यां महानिशि भगवता साक्षात् (यत्) प्रोक्तं तद् अक्षरशः उच्यते ।

भावार्थ—सावनके शुक्लपक्षमें और एकादशीकी अर्धरात्रिमें श्रीपुरुषोत्तमभगवान्ने जो प्रत्यक्ष कह्यो सो अक्षर २ में कहूंहूं ॥१॥

ब्रह्मसंबंधकरणात् सर्वेषां देहजीवयोः ।
सर्वदोषनिवृत्तिर्हि दोषाः पंचविधाः स्मृताः । २ ।

अन्वय—ब्रह्मसंबंधकरणात् सर्वेषां देहजीवयोः सर्वदोषनिवृत्तिः हि (भवति), दोषाः पंचविधाः स्मृताः ।

भावार्थ—आत्मासहित निज सर्व पदार्थनको भगवानकूं निवेदन करवेसूं सब जीवनके देह और लिंगशरीरयुक्त जीव संबंधी सब दोषनकी निवृत्ति होय है, अर्थात् वे स्वरूपसूं रहेंभी हैं तोभी सेवामें प्रतिबंध नहीं करें हैं, वे दोष, पांच प्रकारके हैं । जैसें—

कठि० समास—ब्रह्मणासह संबंधः ब्रह्मसंबंधः, तस्य करणं तस्मात् । पंच विधाः येषां ते ॥ २ ॥

सहजा देशकालोत्था लोकवेदनिरूपिताः ।
संयोगजाः स्पर्शजाश्च न मंतव्याः कथंचन । ३ ।

अन्वय—लोकवेदनिरूपिताः सहजाः देशकालोत्थाः संयोगजाः च स्पर्शजाः कथंचन (हरिसेवायां प्रतिवन्धकाः) न मन्तव्याः।

भावार्थ—लोक और वेदमें कहे, अहंताममतादिरूप सहज, अंगवंगादि दुर्देशमें जन्मादि भयेसों देशोत्थ, कलियुगदुर्मुहूर्तादिमें जन्म होयवेसों कालोत्थ, मनके संयोगसों भये मानसिक दुष्क्रियारूप संयोगज, तथा स्पर्शजदोष, निवेदनके अनंतर सेवामें प्रतिबंधक कभी न मानने चहियें।

कठिनांश समास—सहजाताः सहजाः। देशकालाभ्यां उत्थाः देशकालोत्थाः। ३।

अन्यथा सर्वदोषाणां न निवृत्तिः कथंचन।
असमर्पितवस्तूनां तस्माद्वर्जनमाचरेत्। ४।

अन्वय—अन्यथा सर्वदोषाणां निवृत्तिः कथंचन न (भवति), तस्मात् असमर्पितवस्तूनां वर्जनं आचरेत्।

भावार्थ—भगवन्निवेदन किये विना पूर्वोक्त दोषनकी निवृत्ति कोई तरहसूंभी नहीं होय है, तासूं दोषनिवृति होयवेकेलिये भगवानके अनिवेदित पदार्थनकूं अपने उपयोगमें न ले।

कठि० समास—असमर्पितानि च तानि वस्तूनि च असमर्पितवस्तूनि तेषाम्। ४।

निवेदिभिः समर्प्यैव सर्वं कुर्यादिति स्थितिः।
न मतं देवदेवस्य सामिभुक्तं समर्पणम्। ५।
तस्मादादौ सर्वकार्ये सर्ववस्तुसमर्णम्।

अन्वय—(भक्तः) समर्प्य एव निवेदिभिः (पदार्थैः) सर्वं कुर्यात् इति स्थितिः (अस्ति), देवदेवस्य सामिभुक्तं समर्पणं न मतं। तस्मात् सर्वकार्ये आदौ सर्ववस्तुसमर्पणं (कर्तव्यं)।

भावार्थ—तासों भगवद्भक्त समर्पण करकें और निवेदित पदार्थनसूंही सब कार्य करें यह पुष्टिमार्गकी मर्यादा है, देवदेव श्रीभगवान्कूं अर्धभुक्त समर्पण संमत नहीं है, तासूं सर्वकार्यकी आदिमें समग्रवस्तुकोही श्रीहरिकूं अर्पण करें (अर्द्धभुक्तको नहीं),

कठि० समास—निवेदनं निवेदः, निवेदः अस्ति येषां ते निवेदिनः तैः । सामि भुक्तं सामिभुक्तम् । सर्वं च तत् कार्यं च सर्वकार्यं, तस्मिन् ।५।

दत्ताऽपहारवचनं तथा च सकलं हरेः । ६ ।
न ग्राह्यमिति वाक्यं हि भिन्नमार्गपरं मतम् ।

अन्वय—तथा च हरेः सकलं न ग्राह्यं इति दत्तापहारवचनं (तत्) वाक्यं भिन्नमार्गपरं मतम् ।

भावार्थ—और तेसेंही भगवानकी निवेदितवस्तु अपने उपयोगमें न लानी इत्यादि जो 'अपि दीपावलोकं मे नोपयुंज्यं निवेदितं' एकादशके वाक्य हैं वे वाक्य भक्तिमार्गसों जुदे मार्गके लिये हैं ।

कठि० समास—दत्तस्य अपहारः दत्तापहारः, दत्तापहारः न कार्य इति वचनं दत्तापहारवचनं । ६ ।

सेवकानां यथा लोके व्यवहारः प्रसिद्ध्यति । ७ ।
तथा कार्यं समर्प्यैव सर्वेषां ब्रह्मता ततः ।
गंगात्वं सर्वदोषाणं गुणदोषादिवर्णना । ८ ।
गंगात्वेन निरूप्या स्यात्तद्वदत्रापि चैव हि ।

। इतिश्रीवल्लभाचार्यविरचितं सिद्धान्तरहस्यं सम्पूर्णम् ।

अन्वय—यथा लोके सेवकानां व्यवहारः प्रसिद्धयति, तथा समर्प्य एव सर्वं कार्यं ततः सर्वेषां ब्रह्मता स्यात् । सर्वदोषाणां

गंगात्वं, च गुणदोषादिवर्णना गंगात्वेन एव निरूप्या स्यात्, हि तद्वत् अत्र अपि ।

भावार्थ—जैसे लोकमें 'सब कार्य स्वामीको निवेदनकरकेंहीं करने' ये सेवकनको व्यवहार प्रसिद्ध है, तैसेही हरिभक्तनकोंभी लौकिक वैदिक सर्व कार्य श्रीहरिकों निवेदन करकेंहीं करने, ऐसें करवेसों कितनेक कालमें सबनकों निर्दोषपनो और समभाव प्राप्त होय है, जैसें अन्यत्र वहते जलके, मलिनता अपवित्रता आदि दोषनकों गंगामें मिलवेसों गंगापनो प्राप्त होय है और उनकी गुणदोषआदिकी कथा, जैसे गंगारूपसों वर्णन करी जाय है, ऐसेंहीं आत्मनिवेदनरूप शरणागतिके अनन्तर जीवके गुणदोषादि, ब्रह्ममें मिलवेसों ब्रह्मरूप होय जाँय हैं ।

कठि० समास—गुणदोषाः आदिः येषां तानि गुणदोषादीनि, तेषां वर्णना गुणदोषादिवर्णना । ७–८ ।

। इतिश्रीसिद्धान्तरहस्यव्रजभाषा सम्पूर्णा ।

॥ श्रीहरिः ॥

व्रजभाषामें

नवरत्नकी टीका।

चिन्ता काऽपि न कार्या निवेदितात्मभिः कदाऽपीति।
भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गतिम्। १।

अन्वय—निवेदितात्मभिः कदा अपि का अपि चिन्ता न कार्या, च भगवान् अपि पुष्टिस्थः इति लौकिकीं गतिं न करिष्यति।

भावार्थ—जिनने आत्मासहित सर्व आत्मीयवस्तूनको भगवान्कूं अर्पण किये है, उन्हे कभीभी कोईतरहकीभी चिन्ता न करनी चहिये, क्योंके भगवान्भी अनुग्रहमें स्थित हैं, तासों अन्य प्रवाहादि लोककीसी गति नहीं करेंगे। १।

निवेदनं तु स्मर्तव्यं सर्वथा तादृशैर्जनैः।
सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यति। २।

अन्वय—तादृशैः जनैः निवेदनं तु सर्वथा स्मर्तव्यं, सर्वेश्वरः च सर्वात्मा (भगवान्) निजेच्छातः करिष्यति।

भावार्थ—उत्तम सेवातत्पर भक्तनके संग निवेदनको स्मरण तो अवश्य करनो, सर्वेश्वर और सबनके आत्मारूप भगवान्, अपनी इच्छासों अथवा अपने स्वीकृत भक्तनकी इच्छासों अपने भक्तनके लौकिक वैदिक सबकार्यनकों सिद्ध करेंगे।

कठि० समास—निजाचासौ इच्छा च निजेच्छा, तस्याः, अथवा निजानां इच्छा निजेच्छा, तस्याः। २।

सर्वेषां प्रभुसंबंधो न प्रत्येकमिति स्थितिः ।
अतोऽन्यविनियोगेऽपि चिन्ता का स्वस्य सोऽपिचेत् । ३ ।

अन्वय—सर्वेषां प्रभुसंबंधः, प्रत्येकं न इति स्थितिः, अतः अन्यविनियोगे अपि का चिन्ता, चेत् स्वस्य सः अपि (का–चिन्ता)।

भावार्थ—आत्मासहित आत्मीय समग्र पदार्थनकूं श्रीहरिको संबंध समानही है अलग २ नहीं है. तासूं आत्मीयवस्तुनको अपनें, और अपनो आत्मीयवस्तूनमें, विनियोग होय तोभी कहा चिन्ता करनी अर्थात् कोई तरहकी चिन्ता नहीं है । ३ ।

अज्ञानादथवा ज्ञानात्कृतमात्मनिवेदनम् ।
यैः कृष्णसात्कृतप्राणैस्तेषां का परिदेवना । ४ ।

अन्वय—कृष्णसात्कृतप्राणैः यैः अज्ञानात् अथवा ज्ञानात् आत्मनिवेदनं कृतं तेषां का परिदेवना ।

भावार्थ—श्रीहरिके, अधीन किये हैं प्राण जिननें ऐसे, जिन भक्तननें आत्मनिवेदन कियो है; उनकूं कौनसी चिन्ता है अर्थात् उन्हे कोई तरहकी चिन्ता नहीं है ।

कठि० समास—कात्स्न्र्येन कृष्णाय प्रतिपादिताः इति, कृष्णसात्कृताः प्राणाः यैः ते, तैः । ४ ।

तथा निवेदने चिन्ता त्याज्या श्रीपुरुषोत्तमे ।
विनियोगेऽपि सा त्याज्या समर्थो हि हरिः स्वतः ।५।

अन्वय—निवेदने, श्रीपुरुषोत्तमे चिन्ता त्याज्याः, तथा विनियोगे अपि सा त्याज्या हि हरिः स्वतः समर्थः ।

भावार्थ—'मेरो निवेदन श्रीहरिने स्वीकार कियो के नहीं' ऐसें श्रीपुरुषोत्तममेंभी चिन्ताको परित्याग करनो तथा कदाचित्

लौकिककार्यादिमें दूसरेको आश्रय लेवेसों अन्यको विनियोग होय तोभी चिन्ताको त्याग करनों क्योंके श्रीहरि जीवके साधनकी अपेक्षा न राखकें स्वयं समर्थ हैं।

लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति।
पुष्टिमार्गस्थितो यस्मात्साक्षिणो भवताऽखिलाः। ६।

अन्वय—यस्मात् (जीवः) पुष्टिमार्गस्थितः (तस्मात्), हरिः लोके तथा वेदे स्वास्थ्यं तु न करिष्यति, (तस्मात्) (लोक-वेदकर्मसु) अखिलाः साक्षिणः भवत।

भावार्थ—जासों जीव अनुग्रहमार्गमें स्थित है तासों श्रीहरि लोक और वेदमें आसक्ति न करावेंगे, तासों लोकवेदके कार्य साक्षिमात्र रहके करने चहियें। ६।

सेवाकृतिर्गुरोराज्ञाऽबाधनं वा हरीच्छया।
अतः सेवापरं चित्तं विधाय स्थीयतां सुखम्। ७।

अन्वय—गुरोः आज्ञाऽबाधनं (यथास्यात्तथा) सेवाकृतिः, वा हरीच्छया (सेवाकृतिः), अतः सेवापरं चित्तं विधाय सुखं स्थीयताम्।

भावार्थ—गुरुकी आज्ञानुसार सेवा करनो अथवा सामग्री-आदिके विषयमें जो प्रभुकी विशेष इच्छा होय तो प्रभुइच्छानु-सारही करनो, ऐसें गुरुकी आज्ञाके अबाधमें वा बाधमें प्रभुसेवामें चित्तकूं तत्पर करकें सुखसूं रहनो।

कठि० समा०—आज्ञायाः अबाधनं आज्ञाबाधनं। हरेः इच्छा हरीच्छा तया। सेवायां परं सेवापरं। ७।

---

१. अन्तर्णिजन्तमिदं रूपम् अनु०

चित्तोद्वेगं विधायाऽपि हरिर्यद्यत्करिष्यति ।
तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् । ८ ।

अन्वय—चित्तोद्वेगं विधाय अपि हरिः यत् यत् करिष्यति, (तत्-तत्) तस्य तथा एव लीला इति मत्वा चिन्तां द्रुतं त्यजेत् ।

भावार्थ—मनमें उद्वेग करकेंभी 'श्रीहरि जो जो करें सो सो सब उनकी वैसीही लीला (क्रीडा) है' यह मानकें चिन्ताको जल्दी परित्याग करनो । ८ ।

तस्मात्सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदद्भिरेव सततं स्थेयमित्येव मे मतिः । ९ ।

अन्वय—तस्मात् सर्वात्मना नित्यं मम श्रीकृष्णः शरणं (इति) सततं वदद्भिः एव स्थेयं इति एव मे मतिः ।

भावार्थ—तासों 'सबतरहसों सर्वदा मेरे श्रीकृष्णही रक्षा करवेवारे हैं' ऐसें सदा कहतेही रहनों येही मेरी मति है ॥ ९ ॥

। इति श्रीनवरत्नव्रजभाषा सम्पूर्णा ।

॥ श्रीहरिः ॥

व्रजभाषामें

अंतःकरणप्रबोधकी विवृति ।

अंतःकरण मद्वाक्यं सावधानतया शृणु ।
कृष्णात्परं नास्ति दैवं वस्तुतो दोषवर्जितम् । १ ।

अन्वय—हे अंतःकरण मद्वाक्यं सावधानतया शृणु, कृष्णात् परं वस्तुतः दोषवर्जितं दैवं न अस्ति ।

भावार्थ—हे अंतःकरण ! मेरे वाक्यकूं तू सावधान होयकें सुन, कृष्णसूं दूसरो वास्तवमें दोषरहित देवता नहीं है ।

कठि० समास—अवधानेन सहितं साऽवधानं, तस्य भावः सावधानता, तया । १ ।

चाण्डाली चेद्राजपत्नी जाता राज्ञा च मानिता ।
कदाचिदपमाने वा मूलतः का क्षतिर्भवेत् । २ ।

अन्वय—चाण्डाली चेत् राजपत्नी जाता, च राज्ञा मानिता कदाचित् अपमाने (सति) वा मूलतः का क्षतिः भवेत् ।

भावार्थ—चाण्डाली जो राजाकी रानी होय, और राजाने दूसरी रानीन करतें वाकूं अधिक मानी होय, और फिर कोई-समय वाहीके अपराधसूं वाको अपमान भयो होय, तो राजपत्नीपनेमें कहा हानि भई ? अर्थात् कछु नही, ऐसेहीं हे अंतःकरण ! कदाचित् प्रभु, फल देयवेमें विलंबभी करैं तथापि अंगीकारमें कोईतरहकी हानि नहीं है, तासूं चिन्ता नहीं करनी । २ ।

समर्प्पणादहं पूर्वमुत्तमः किं सदा स्थितः ।
का ममाऽधमता भाव्या पश्चात्तापो यतो भवेत् ॥३॥

अन्वय—अहं समर्पणात् पूर्वं किं सदा उत्तमः स्थितः ? मम अधमता का भाव्या ? यतः पश्चात्तापः भवेत् ।

भावार्थ—मैं, समर्पणके पूर्वमें कहा सदा उत्तमही हो ? तासूं फलविलंबमेभी मेरी हलकावट कहा विचारनी, जासूं पश्चात्ताप होय, अर्थात् फलविलंबकी दशामेभी 'मैं पहलेसूं तो अच्छोहूं' यों विचारके अपनो हलकोपन न विचारनो और पश्चात्तापभी न करनो । ३ ।

सत्यसंकल्पतो विष्णुर्नान्यथा तु करिष्यति ।
आज्ञैव कार्या सततं स्वामिद्रोहोऽन्यथा भवेत् । ४ ।

अन्वय—विष्णुः (श्रीहरिः) सत्यसंकल्पतः अन्यथा तु न करिष्यति, (तस्मात्) सततं आज्ञा एव कार्या, अन्यथा स्वामिद्रोहः भवेत् ।

भावार्थ—सर्वत्रव्यापक श्रीहरि सांचेविचारवारे हैं, तासूं फलदेयवेके विषयमें औरतरहसूं तो नहीं करेंगे, तासूं सर्वदा प्रभुकी आज्ञाके अनुसारही सेवा करनी वैसें नहीं करवेसूं स्वामीको द्रोह होय है ।

कठि० समास—सत्यः संकल्पो यस्य सः सत्यसंकल्पः, तस्मात् । ४ ।

सेवकस्य तु धर्मोऽयं स्वामी स्वस्य करिष्यति ।
आज्ञा पूर्वं तु या जाता गंगासागरसंगमे । ५ ।
याऽपि पश्चान्मधुवने न कृतं तद्द्वयं मया ।
देहदेशपरित्यागस्तृतीयो लोकगोचरः । ६ ।

अन्वय—सेवकस्य तु अयं धर्मः (अस्ति) स्वामी स्वस्य करिष्यति, पूर्वं तु गंगासागरसंगमे या आज्ञा जाता, पश्चात् मधुवनेऽपि या जाता, मया देहदेशपरित्यागः तद्द्वयं न कृतं, तृतीयः लोकगोचरः (कृतः)।

भावार्थ—सेवकको तो श्रीहरिकी आज्ञाकरनी येही धर्म है, प्रभु अपने भक्तको सव कार्य स्वयं करेंगे, पहलें तो गंगासागर-संगमपे जो देहपरित्यागरूप आज्ञा भयी, और पीछें मधुवनमेंभी जो देशपरित्यागरूप आज्ञा भई, मैंने देहदेशपरित्यागरूप दोनों आज्ञा नहीं करीं परन्तु तीसरी लोकमें प्रसिद्ध संन्यासग्रहणपूर्वक गृहको परित्यागरूप आज्ञा करी।

कठि० समास—गंगा च सागरश्च गंगासागरौ तयोः संगमः, तस्मिन्। तयोः द्वयं तद्द्वयम्। ५–६।

पश्चात्तापः कथं तत्र सेवकोऽहं नचाऽन्यथा।
लौकिकप्रभुवत्कृष्णो न द्रष्टव्यः कदाचन। ७।

अन्वय—अहं सेवकः अन्यथा न, तत्र पश्चात्तापः कथं, च कृष्णः लौकिकप्रभुवत् कदाचन न द्रष्टव्यः।

भावार्थ—में प्रभुको सेवक हूं और नहीं हूं, तासूं फलमें विलंव होय तौभी पश्चात्ताप क्यों करनो, और श्रीहरिकूं लौकिकराजा आदिकी तरह चलचित्त कभीभी नहीं जाननें चहियें।

कठि० समास—लोके भवः लौकिकः, लौकिकश्चासौ प्रभुश्च लौकिकप्रभुः, लौकिकप्रभुणा तुल्यः लौकिकप्रभुवत्। ७।

सर्वं समर्पितं भक्त्या कृतार्थोसि सुखी भव।
प्रौढापि दुहिता यद्वत्स्नेहान्न प्रेष्यते वरे। ८।
तथा देहे न कर्तव्यं वरस्तुष्यति नान्यथा।

अन्वय—भक्त्या सर्वं समर्पितं, कृतार्थः असि, सुखी भव,

यद्वत् प्रौढा अपि दुहिता स्नेहात् वरे न प्रेष्यते, तथा देहे न कर्तव्यं अन्यथा वरः न तुष्यति ।

भावार्थ—भक्तिसूं आत्मासहित सब अपनी वस्तुनको अर्पण तेने कियो, तासूं तू कृतार्थ है, और पहलेंकी तरह सुखी हो, हे अन्तःकरण जैसे कितनेक अज्ञानी पतिके यहां जायवे लायकभी कन्याकों स्नेहसों वाके पतिके यहां नहीं भेजे हैं, तैसें देहत्यागके विषयमें तोकूंभी विलंब नहीं करनो चहिये, विलंबकरवेसूं प्रभु प्रसन्न नहीं होंयगे । ८ ।

लोकवच्चेत्स्थितिर्मे स्यात्किं स्यादिति विचारय । ९ ।
अशक्ये हरिरेवाऽस्ति मोहं मागाः कथंचन ।
इति श्रीकृष्णदासस्य वल्लभस्य हितं वचः । १० ।
चित्तं प्रति यदाकर्ण्य भक्तो निश्चिन्ततां व्रजेत् ।

। इति श्रीवल्लभाचार्यकृतोऽन्तःकरणप्रबोधः सम्पूर्णः ।

अन्वय—(हे अंतःकरण) लोकवत् चेत् मे स्थितिः स्यात् किं स्यात् इति (त्वं) विचारय अशक्ये हरिः एव अस्ति (अतः) कथंचन मोहं मागाः श्रीकृष्णदासस्य वल्लभस्य चित्तं प्रति इति हितं वचः, यत् आकर्ण्य भक्तः निश्चिन्ततां व्रजेत् ।

भावार्थ—हे अंतःकरण अन्यलोककीतरह मेरीभी जो लौकिकउत्कर्षादिके लिये लोकमें स्थिति होय तो कहा होय, यह तूही विचारकर, अर्थात् लौकिक उत्कर्षके लिये प्रभुकी अप्रसन्नता करनी योग्य नहीं है, अशक्य कार्यमें श्रीहरिही पुरुपार्थसिद्ध करवे वारे हैं तासूं कोईतरहकी चिन्ताकूं प्राप्त मत होय, श्रीहरिके दास श्रीवल्लभाचार्यको अंतःकरणके प्रति यह हितकारी (यथार्थ) वचन है जाकूं अच्छीतरह सुनकें भक्तजन, चिन्तारहित होयजांय हैं । ९–१०॥ ।

। इति श्री अंतःकरणप्रबोध व्रजभाषा सम्पूर्णा ।

॥ श्रीहरिः ॥

ब्रजभाषामें.

विवेकधैर्य्याश्रयकी विवृति ।

विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।
विवेकस्तु 'हरिः सर्वं निजेच्छातः करिष्यति' । १ ।

अन्वय—विवेकधैर्ये सततं रक्षणीये, तथा आश्रयः (रक्षणीयः), तु हरिः निजेच्छातः सर्वं करिष्यति (इति) विवेकः ।

भावार्थ—विवेक और धैर्य हमेशां राखने तथा आश्रयभी राखनो, और 'श्रीहरि अपनी इच्छासूंही अथवा अपने भक्तनकी इच्छासूं सर्व करेंगे' याको नाम विवेक है ।

कठि० समास—निजा चासौ इच्छा च, तस्याः निजेच्छातः । किंवा, निजानां इच्छा निजेच्छा ।

प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात् ।
सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च । २ ।

अन्वय—स्वाम्यभिप्रायसंशयात्, प्रार्थिते वा ततः किं स्यात्, हि तस्य सर्वत्र सर्वं, च सर्वसामर्थ्यं एव ।

भावार्थ—'प्रभुकूं हमारी इच्छितवस्तु देयवेकी इच्छा है के नहीं' ऐसो संदेह होयवेसूं जो प्रार्थनाभी करी जाय तो कहा होय, अर्थात् कछु फल नहीं होय, तासों 'श्रीहरिकूं सर्वत्र सर्ववस्तु लभ्य हैं' और 'सर्ववस्तुके देयवेकी सामर्थ्यभी है ही' यों मनमें दृढता राखकें सेवाकरनो ।

कठि० समास—स्वामिनः अभिप्रायः स्वाम्यभिप्रायः, तस्मिन् संशयः स्वाम्यभिप्रायसंशयः, तस्मात् । समर्थस्य कर्म सामर्थ्यं, सर्वं च तत्सामर्थ्यं च सर्वसामर्थ्यम् । २ ।

अभिमानश्च संत्याज्यः स्वाम्यधीनत्वभावनात् ।
विशेषतश्चेदाज्ञा स्यादंतःकरणगोचरः । ३ ।
तदा विशेषगत्यादि भाव्यं भिन्नं तु दैहिकात् ।

अन्वय—स्वाम्यधीनत्वभावनात् अभिमानः च संत्याज्यः, अंतःकरणगोचरः (इति) चेत् विशेषतः आज्ञा स्यात्, तदा विशेषगत्यादि भाव्यं, तु दैहिकात् भिन्नं (भाव्यम्) ।

भावार्थ—'मैं स्वामीके अधीन हूं' ऐसी भावनासूं अभिमानकोभी वासनासहित परित्याग करनो, श्रीहरि सबभक्तनके अंतःकरणमें विराजें हैं, तासूं यदि सेवादिके विषयमें स्वप्नादिद्वारा कछु विशेष आज्ञा होय तो लौकिक कार्यके सिवाय सेवा सामग्री आदि, प्रभुकी आज्ञाके अनुसार करनीचहिये ।

कठि० समास—स्वामिनः अधीनः स्वाम्यधीनः, तस्य भावः स्वाम्यधीनत्वं, तस्य भावनं, तस्मात् । ३ ।

आपद्गत्यादिकार्येषु हठस्त्याज्यश्च सर्वथा । ४ ।
अनाग्रहश्च सर्वत्र धर्माधर्माग्रदर्शनम् ।
विवेकोऽयं समाख्यातो धैर्यं तु विनिरूप्यते । ५ ।

अन्वय—च आपद्गत्यादिकार्येषु सर्वथा हठः त्याज्यः, सर्वत्र अनाग्रहः (कर्तव्यः) धर्माऽधर्माग्रदर्शनं (कर्तव्यं) अयं विवेकः समाख्यातः, धैर्यं तु विनिरूप्यते ।

भावार्थ—और धनके संकोचकी अवस्थामें जो सेवाके वडे कार्य आमें उनमें 'कर्जकरकेभी यह करूंगो' ऐसो हठ न करनों,

और 'सेवाको परित्यागकरकेभी' हवनादि कार्य करूंगो, एसोभी आग्रह न करनो किन्तु सेवाके अनवसरमें वे कार्य करने तथा श्रुत्युक्त स्मृत्युक्त और भगवद्धर्मके वलावलको विचारकरकें अपने अधिकारानुसार कार्य करने। ४–५।

त्रिदुःखसहनं धैर्यमामृतेः सर्वतः सदा।
तक्रवद्देहवद्भाव्यं जडवद्गोपभार्यवत्। ६।

अन्वय—आमृतेः सर्वतः सदा त्रिदुःखसहनं धैर्यं, तक्रवद्देहवत् जडवत् गोपभार्यवत् भाव्यम्।

भावार्थ—'मरणपर्यन्त सवतरहसों और सवसमयमें आधिभौतिक आध्यात्मिक आधिदैविक (परीक्षाकेलिये भगवद्दत्त) 'तीनों तरहके दुःखनको सहनकरनो' धैर्य कहावे है, देहाध्यासको परित्याग करवेके लिये छाछकीतरह विचार करनो अर्थात् जैसे घीनिकासे पीछें कोईभी छाछमें मोह नही राखे है ऐसें देहमें मोह न करनो, आध्यात्मिक दुःख सहन करते समय जडभरतके धैर्यको विचार करनो और भगवान्ने परीक्षार्थ दिये दुःखनके भोगसमयमें गोपस्त्रीकीतरह दुःख सहन करनो। अथवा अंतर्गृहगत गोपीनकीतरह भगवद्विरह सहन करनो। ६।

क० समा०—तक्रेण तुल्यं तक्रवत्, तच्चासौ देहश्च तक्रवद्देहः, तेन तुल्यं तक्रवद्देहवत्। भार्याणां समूहः भार्यं, गोपानां भार्यं गोपभार्यं तेन तुल्यं गोपभार्यवत्।

प्रतीकारो यदृच्छातः सिद्धश्चेन्नाग्रही भवेत्।
भार्यादीनां तथाऽन्येषामसतश्चाक्रमं सहेत्। ७।

१–हत्वा नृपं पतिमवेक्ष्य भुजंगदष्टं देशान्तरे विधिवशाद्गणिकाऽस्मि जाता।
पुत्रं पतिं समधिगम्य चितां प्रविष्टा शोचामि गोपगृहिणी कथमद्य तक्रम्।१।
इत्याख्यायिकाऽत्रानुसंधेया।

अन्वय—यदृच्छातः चेत् प्रतीकारः सिद्धः आग्रही न भवेत्, भार्यादीनां च अन्येषां च असतः आक्रमं सहेत् ।

भावार्थ—भगवदिच्छासों जो दुःखनको उपाय होय जाय तो दुःख सहन करवेमें आग्रह न करै, और स्त्रीपुत्रादि, बन्धुवर्ग, तथा और सेवकादिने किये अपमानकोंभी सेवानिर्वाहके लिये सहन करै । ७ ।

स्वयमिन्द्रियकार्याणि कायवाङ्मनसा त्यजेत् ।
अशूरेणाऽपि कर्तव्यं स्वस्यासामर्थ्यभावनात् । ८ ।

अन्वय—स्वयं इन्द्रियकार्याणि कायवाङ्मनसा त्यजेत्, स्वस्य असामर्थ्यभावनात् अशूरेण अपि कर्तव्यम् ।

भावार्थ—अपने भोगवेके लिये सर्वविषयनको शरीरवाणीमनसूं परित्याग करै, और 'इन्द्रियनको दमनकरनो मेरी शक्तिसूं वाहर है' ऐसे विचारसूं असमर्थ भये पुरुषकूंभी इन्द्रियनको दमन करनो चहिये ।

कठि० समास—कायश्च वाक् च मनश्च कायवाङ्मनः, तेन । समासान्तविधेरनित्यत्वम् ।

अशक्ये हरिरेवास्ति सर्वमाश्रयतो भवेत् ।
एतत्सहनमत्रोक्तमाश्रयोऽतो निरूप्यते । ९ ।

अन्वय—अशक्ये हरिः एव अस्ति, (यतः) आश्रयतः सर्वं भवेत्, अत्र एतत्सहनं उक्तं, अतः आश्रयः निरूप्यते ।

भावार्थ—आपसूं न बनसकै ऐसे कार्यमें श्रीहरिही रक्षक हैं, क्यों के प्रभुके दृढ आश्रयसों सर्वकार्यनकी सिद्धि होय है, यहां यह त्रिदुःखसंहनरूप धैर्यको निरूपण कियो, अब आगें आश्रयको निरूपण करें हैं । ९ ।

ऐहिके पारलोके च सर्वथा शरणं हरिः ।
दुःखहानौ तथा पापे भये कामाद्यपूरणे । १० ।
भक्तद्रोहे भक्त्यभावे भक्तैश्चापि क्रमे कृते ।
अशक्ये वा सुशक्ये वा सर्वत्र शरणं हरिः । ११ ।

अन्वय—ऐहिके पारलोके च दुःखहानौ तथा पापे, भये (च) कामाद्यपूरणे, सर्वथा हरिः शरणं (अस्ति), (किंच) भक्तद्रोहे, भक्त्यभावे च भक्तैः क्रमे कृते, अपि वा अशक्ये वा सुशक्ये सर्वथा हरिः शरणम् ।

भावार्थ—या लोकसंबंधी और परलोकसंबंधी कार्यमें, तीन-प्रकारके दुःखनकी निवृत्ति होयवेमें, अज्ञानसूं बनते पापनके विषयमें, और राज चौर नरकादिके भयमें, तथा मनोरथकी अप्राप्तिमें, सबतरहसूं भक्तके दुःख दूरकरनवारे श्रीहरिही रक्षा-करवेवारे हैं, तथा भक्तनके द्रोहबनवेमें, भक्तिके अभावमें, और भक्तनने अपनो तिरस्कार कियो होय वासमयमेंभी, किंवा अप-नसूं न बनतेकार्यमें अथवा अच्छीतरह बनसकतो होय ऐसे कार्यमें, सर्वसमयमें श्रीहरिही रक्षाकरवेवारे हैं ।

कठि० समास—इहभवं ऐहिकं । परलोके भवं पारलौकिकम् । कामादीनां अपूरणं कामाद्यपूरणं, तस्मिन् । १०-११ ।

अहंकारकृते चैव पोष्यपोषणरक्षणे ।
पोष्यातिक्रमणे चैव तथांऽतेवास्यतिक्रमे । १२ ।
अलौकिकमनःसिद्धौ सर्वार्थे शरणं हरिः ।
एवं चित्ते सदा भाव्यं वाचा च परिकीर्तयेत् । १३ ।

अन्वय—अहंकारकृते च एव पोष्यपोषणरक्षणे च एव पो-ष्यातिक्रमणे, तथा अंतेवास्यतिक्रमे, अलौकिकमनःसिद्धौ 'सर्वार्थे हरिः शरणं' एवं सदा चित्ते भाव्यं च वाचा परिकीर्तयेत् ।

भावार्थ—स्वभावके वशहोकें कोईसमय जो अहंकार कियो होय तामें, औरभी पालन करवेलायक अपने स्त्रीपुत्रादिकी रक्षाकरवेमें, और स्त्रीपुत्रादिकननें अपनो अपराध कियो होय ता समयमें तथा शिष्यादिकनसूं कछू चूक होयगई होय वा समयमें और अलौकिक देहेन्द्रियादिकी प्राप्तिमें, विशेष कहा मनोरथमात्रकी सिद्धिमें 'श्रीहरि मेरे रक्षक हैं' ऐसें सदा हृदयमें विचारते रहनो, और मुखसूंभी कहते रहनो।

कठि० समास—अहंकारेण कृतं अहंकारकृतं तस्मिन्। अलौकिकं च तत् मनश्च अलौकिकमनः (मनइति देहेन्द्रियादीनामुपलक्षणम्) अलौकिकमनसः सिद्धिः अलौकिकमनःसिद्धिः, तस्याम्। १२-१३।

अन्यस्य भजनं तत्र स्वतोगमनमेव च।
प्रार्थना कार्यमात्रेऽपि ततोऽन्यत्र विवर्जयेत्। १४।

अन्वय—अन्यस्य भजनं तत्र स्वतः गमनं एव, च कार्यमात्रे अपि ततः (अथवा) अन्यत्र प्रार्थना विवर्जयेत्।

भावार्थ—अन्यदेवनको भजन, तेसेंही अपनेआप अथवा कहेसूं उनके शरणजानो, और कोईभी कार्यमें प्रभुसूं अथवा अन्यदेवनसों प्रार्थना करनी। इन सबबातनको परित्याग करनो १४।

अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः।
ब्रह्मास्त्रचातकौ भाव्यौ प्राप्तं सेवेत निर्ममः। १५।

अन्वय—अविश्वासः तु न कर्तव्यः, सः सर्वथा बाधकः (भवति), ब्रह्मास्त्रचातकौ भाव्यौ निर्ममः सन् प्राप्तं सेवेत।

भावार्थ—प्रभुमें अथवा शरणजायवेमें अविश्वास तो कभी न करनों, क्योंके अविश्वास (अन्वयव्यतिरेकसूं) हानिकारक ही है, ब्रह्मास्त्र और पपीहा पक्षीको विचार करनो अर्थात् जो अविश्वास करै तो जैसे राक्षसनने हनुमान्जीकूं प्रथम ब्रह्मास्त्रसूं

चांधे, फिर वाकेऊपर अविश्वासकरके और रस्सी वगेरहसूं बांधे तव ब्रह्मास्त्रने हनुमानजीकूं स्वयं छोडदीने और राक्षसनकूं लंका-दाहादि अनेक दु:ख भोगने पडे, अथवा जैसे चातक मेघपै विश्वास राखे है तो वाके अविश्वास न करवेसूं मेघभी स्वातिवर्षाद्वारा वाकूं सुखदेय है, ऐसेंही प्रभुमें अविश्वास सवतरहसूं हानिकरवे-वारो है, तासूं थोडो के वहोत जो मिलै तामें सेवा करै । १५ ।

यथाकथंचित्कार्याणि कुर्यादुच्चावचान्यपि ।
किं वा प्रोक्तेन वहुना शरणं भावयेद्धरिम् । १६ ।

अन्वय—उच्चावचानि कार्याणि अपि यथाकथंचित् कुर्यात्, वा वहुना प्रोक्तेन किम्? हरिं शरणं भावयेत् । १६ ।

भावार्थ—लौकिक वैदिक सवतरहके कार्यनकूंभी जैसे वनें वैसे करै, वहोत कहा कहैं केवल 'श्रीहरि मेरे रक्षक हैं' ऐसो विचार करै, । १६ ।

एवमाश्रयणं प्रोक्तं सर्वेषां सर्वदा हितम् ।
कलौ भक्त्यादिमार्गा हि दुस्साध्या इति मे मतिः ।१७।

अन्वय—एवं, सर्वेषां सर्वदा हितं आश्रयणं प्रोक्तम्, हि कलौ भक्त्यादिमार्गाः दुस्साध्या इति मे मतिः (अस्ति) ।

भावार्थ—यारीतिसूं सदा सवको हितकरवेवारो भगवान्को आश्रय कह्यो, कारणके कलियुगमें चार भेदवारे भक्तिमार्ग कठि-नसूं सिद्ध हांय हैं, यह मेरी वुद्धि है । १७ ।

। इति श्रीविवेकधैर्याश्रयटीका सम्पूर्णा ।

१–साम्प्रतिकभक्तिमार्गीयाणामिमां सेवादुर्दशां विचार्यैव सर्वज्ञैराचार्यवर्यैरि-दमुक्तमिति भाति । अनु०

॥ श्रीहरिः ॥

ब्रजभाषामें

कृष्णाश्रयकी टीका ।

सर्वमार्गेषु नष्टेषु कलौ च खलधर्मिणि ।
पाषंडप्रचुरे लोके कृष्ण एव गतिर्मम । १ ।

अन्वय—खलधर्मिणि कलौ सर्वमार्गेषु नष्टेषु च लोके पाषंडप्रचुरे मम कृष्ण एव गतिः ।

भावार्थ—दुष्ट धर्मवारे या कलियुगमें वेदोक्त सब मार्ग लुप्त होय गये हैं, और लोकभी अतिपाखंडी होयगये हैं, तासों अब मेरे श्रीहरिही रक्षा करवेवारे हैं ।

कठि० समास—खलश्चासौ धर्मश्च खलधर्मः, खलधर्मः अस्ति यस्मिन् खलधर्मी, तस्मिन्। पाषंडः प्रचुरः यस्य सः पाषंडप्रचुरः, तस्मिन्।१।

म्लेच्छाक्रान्तेषु देशेषु पापैकनिलयेषु च ।
सत्पीडाव्यग्रलोकेषु कृष्ण एव गतिर्मम । २ ।

अन्वय—पापैकनिलयेषु सत्पीडाव्यग्रलोकेषु देशेषु, म्लेच्छाक्रान्तेषु (सत्सु) मम कृष्ण एव गतिः (अस्ति) ।

भावार्थ—पापमात्रके रहवेके प्रधान घर, और सत्पुरुषनकी पीडासूं दुःखितभये हैं लोक जिनके, एसे देश, म्लेच्छनने दवायलीने हैं तासूं श्रीकृष्णही मेरी रक्षा करवेवारे हैं ।

कठि० समास—एके च ते निलयाश्च एकनिलयाः, पापस्य एकनिलयाः पापैकनिलयाः, तेषु । सतां पीडा सत्पीडा, तया व्यग्राः लोकाः येषु ते, तेषु । २ ।

गंगादितीर्थवर्येषु दुष्टैरेवावृतेष्विह ।
तिरोहिताधिदैवेषु कृष्ण एव गतिर्मम । ३ ।

अन्वय—इह दुष्टैः एव आवृतेषु गंगादितीर्थवर्येषु, तिरोहिताधिदैवेषु (सत्सु) मम कृष्ण एव गतिः ।

भावार्थ—या कलिमें दुष्टजननसूं आक्रान्त, गंगादिकूं आदिलेकें उत्तम २ तीर्थनकेभी. जब अधिष्ठाता देवगण (किंवा आधिदैविक तीर्थ) तिरोहित होयगये तो अब मेरे श्रीकृष्णही रक्षक हैं । ३ ।

अहंकारविमूढेषु सत्सु पापानुवर्तिषु ।
लाभपूजार्थयत्नेषु कृष्ण एव गतिर्मम । ४ ।

अन्वय—अहंकारविमूढेषु, लाभपूजार्थयत्नेषु सत्सु, पापानुवर्तिषु, मम कृष्ण एव गतिः ।

भावार्थ—अहंकारकरके भ्रान्त और लाभ और मानकें लिये विशेष यत्न करनवारे सत्पुरुषभी जब पापको आचरण करन लगगये तो मेरे श्रीकृष्णही रक्षक हैं ।

कठि० समास—लाभश्चपूजा च लाभपूजे, ताभ्यामिति लाभपूजार्थं, लाभपूजार्थं यत्नः येषां ते, तेषु ।

अपरिज्ञाननष्टेषु मंत्रेष्वव्रतयोगिषु ।
तिरोहिताधिदैवेषु कृष्ण एव गतिर्मम । ५ ।

अन्वय—अपरिज्ञाननष्टेषु अव्रतयोगिषु मंत्रेषु, तिरोहिताधिदैवेषु (सत्सु), मम कृष्ण एव गतिः ।

भावार्थ—स्वरूपज्ञान न होयवेसूं और ब्रह्मचर्यादितपोरहित पुरुषनके पास आयवेसूं मंत्रभी, जब आधिदैविकशक्तिसूं रहित होयगये तो मेरे रक्षक श्रीकृष्णही हैं । ५ ।

नानावादविनष्टेषु सर्वकर्मव्रतादिषु ।
पाषंडैकप्रयत्नेषु कृष्ण एव गतिर्मम । ६ ।

अन्वय—पाषंडैकप्रयत्नेषु सर्वकर्मव्रतादिषु, नानावादविनष्टेषु (सत्सु) मम कृष्ण एव गतिः ।

भावार्थ—पाषंडको ही जिनमें एक यत्न है ऐसे सब कर्म और व्रतादिभी जब अनेक नास्तिकनके विवादनसूं नष्ट होयगये तो अब श्रीकृष्णही मेरे रक्षक हैं । ६ ।

अजामिलादिदोषाणां नाशकोऽनुभवे स्थितः ।
ज्ञापिताऽखिलमाहात्म्यः कृष्ण एव गतिर्मम । ७ ।

अन्वय—अजामिलादिदोषाणां नाशकः ज्ञापिताखिलमाहात्म्यः अनुभवे स्थितः कृष्ण एव मम गतिः ।

भावार्थ—अजामिल आदि जीवनकेभी दोषनकूं दूरकरवेवारे और ताहीसों प्रगटकियो सर्व निजमाहात्म्य जिनने ऐसे, और अनुभवमें आते श्रीकृष्णही मेरे रक्षक हैं । ७ ।

प्राकृताः सकला देवा गणितानंदकं बृहत् ।
पूर्णानंदो हरिस्तस्मात्कृष्ण एव गतिर्मम । ८ ।

अन्वय—सब देवता भगवच्छक्तिके वशीभूत हैं, और अक्षरब्रह्मभी गिनेभये आनंदवारो है, और श्रीहरि तो पूर्ण आनंदवारे हैं तासूं श्रीकृष्णही मेरे प्राप्त करवेलायक हैं । ८ ।

विवेकधैर्यभक्त्यादिरहितस्य विशेषतः ।
पापासक्तस्य दीनस्य कृष्ण एव गतिर्मम । ९ ।

अन्वय—विवेकधैर्यभक्त्यादिरहितस्य विशेषतः पापासक्तस्य दीनस्य मम (अधिकारिण) कृष्ण एव गतिः ।

भावार्थ—विवेक, धैर्य और भक्तिसूं रहित और वहोतकरके पापमेंही आसक्त और दीन, मेरे (अन्य अधिकारीके) श्रीकृष्णही रक्षक हैं।

कठि० समास—विवेकश्च धैर्यं च भक्तिश्च विवेकधैर्यभक्तयः, ताः आदिर्यस्य तत् विवेकधैर्यभक्त्यादि, तेन रहितः विवेकधैर्यभक्त्यादिरहितः, तस्य। ९।

सर्वसामर्थ्यसहितः सर्वत्रैवाखिलार्थकृत्।
शरणस्थसमुद्धारं कृष्णं विज्ञापयाम्यहम्। १०।

अन्वय—(यः) सर्वसामर्थ्यसहितः (च) सर्वत्र एव अखिलार्थकृत्, (तं) शरणस्थसमुद्धारं कृष्णं अहं विज्ञापयामि।

भावार्थ—जो सर्वशक्तीनसूं युक्त और देशकालवर्ण आश्रमादि सर्व अवस्थामें भक्तनके मनोरथकूं पूर्ण करवेवारे हैं, शरणमें आयेको उद्धारकरवेवारे उन श्रीकृष्णकी मैं प्रार्थना करूं हूं१०

कृष्णाश्रयमिदं स्तोत्रं यः पठेत्कृष्णसन्निधौ।
तस्याश्रयो भवेत्कृष्ण इतिश्रीवल्लभोऽब्रवीत्। ११।

। इतिश्रीवल्लभाचार्यविरचितः कृष्णाश्रयः सम्पूर्णः।

अन्वय—यः इदं कृष्णाश्रयं स्तोत्रं कृष्णसन्निधौ पठेत्, तस्य कृष्णः आश्रयः भवेत् इति श्रीवल्लभः अब्रवीत्।

भावार्थ—जो भक्त या कृष्णाश्रयस्तोत्रको, भगवत्संनिधानमें पाठकरै, वाके श्रीकृष्ण आश्रयरूप होय हैं, यहवात श्रीवल्लभाचार्यने कही। ११।

। इतिश्रीकृष्णाश्रयटीका सम्पूर्णा।

॥ श्रीहरिः ॥

ब्रजभाषामें.

चतुःश्लोकीकी विवृति ।

सर्वदा सर्वभावेन भजनीयो व्रजाधिपः ।
स्वस्याऽयमेव धर्मो हि नान्यः क्वापि कदाचन । १ ।

अन्वय—सर्वदा सर्वभावेन व्रजाधिपः भजनीयः स्वस्य अयं एव धर्मः क्व कदाचन अपि अन्यः न (अस्ति) ।

भावार्थ—सर्वसमयमें पतिपुत्र धन गृह सब श्रीकृष्णही हैं या भावसूं श्रीव्रजेश्वर श्रीकृष्णकी सेवा करनी चहिये, भक्तनको तो येही धर्म है, देश वर्ण आश्रम आदि कोई अवस्थामें और कोई समयमेंभी अन्य धर्म नहीं है ।

कठिनांशका समास—सर्वश्चासौ भावश्च सर्वभावः, अर्थात् सर्वोऽपि पतिपुत्रगृहादि मम भगवानेवेति आत्मन भावः । १ ।

एवं सदा स्वकर्तव्यं स्वयमेव करिष्यति ।
प्रभुः सर्वसमर्थो हि ततो निश्चिन्ततां व्रजेत् । २ ।

अन्वय—सदा स्वकर्तव्यं एवं, (हरिः) स्वयं एव करिष्यति, हि प्रभुः सर्वसमर्थः ततः निश्चिन्ततां व्रजेत् ।

१–'भक्तिमार्गे हरेर्दास्यं धर्मोऽर्थो हरिरेव हि–कामो हरेर्दिदृक्षैव मोक्षः कृष्णस्य सेवनम्' । या वचनसूं श्रीहरिभक्तनकूं तो हरिसेवा, श्रीहरि, हरिदर्शन, और श्रीहरिको प्रेम ही क्रमसूं धर्म, अर्थ, काम, और मोक्ष हैं ।

भावार्थ—सदां भगवदीयनको कर्तव्य पूर्वोक्त प्रकारको है, फलदानादि श्रीहरिको कर्तव्य है, तासूं वे स्वयं करेंगे, कारणके प्रभु कर्तुमन्यथाकर्तुं सर्वसमर्थ हैं, तासूं ऐहिक पारलौकिक मनोरथनके विषयमें निश्चिन्त होयकें रहनो । २ ।

यदि श्रीगोकुलाधीशो धृतः सर्वात्मना हृदि ।
ततः किमपरं ब्रूहि लौकिकैर्वैदिकैरपि । ३ ।

अन्वय—यदि श्रीगोकुलाधीशः सर्वात्मना हृदि धृतः, ततः लौकिकैः वैदिकैः अपि अपरं (फलं) किम् (अस्ति) (इति) (त्वं) ब्रूहि ।

भावार्थ—हे अधिकारिवर्ग ? यदि प्रभु श्रीकृष्णकूं सवतरहसूं हृदयमें धारणकिये, तोफिर तासूं अधिक, लौकिकश्रेयआदि और वैदिकश्रेयआदि फलनसूंभी कहा प्रयोजन है, ये कहो । ३ ।

अतः सर्वात्मना शश्वद्गोकुलेश्वरपादयोः ।
स्मरणं भजनं चाऽपि न त्याज्यमिति मे मतिः । ४ ।

। इति श्रीमद्वल्लभाचार्यविरचिता चतुःश्लोकी सम्पूर्णा ।

अन्वय—अतः शश्वत् गोकुलेश्वरपादयोः सर्वात्मना स्मरणं च भजनं अपि न त्याज्यं इति मे मतिः (अस्ति) ।

भावार्थ—अन्य अवतारनकरतें श्रीकृष्णने अपने भक्तनकूं स्वरूपानंदको दान विशेष दियो है तासूं, हमेशां श्रीगोकुलपतिश्रीहरिके चरणनमें सर्वात्मभावसूं स्मरण तथा सेवन तथा चरणरज, कभी न छोडनी यह मेरी बुद्धि है । ४ ।

। इति श्रीचतुःश्लोकीब्रजभाषा सम्पूर्णा ।

व्रजभाषामें

भक्तिवर्धिनीकी टीका।

यथा भक्तिः प्रवृद्धा स्यात्तथोपायो निरूप्यते।
वीजभावे दृढे तु स्यात्त्यागाच्छ्रवणकीर्तनात्। १।

अन्वय—यथा भक्तिः प्रवृद्धा स्यात् तथा उपायः निरूप्यते, वीजभावे दृढे (सति) त्यागात् तु श्रवणकीर्तनात् (भक्तिः-प्रवृद्धा) स्यात्।

भावार्थ—जैसें भक्ति अत्यंत वृद्धिकूं प्राप्त होय, तेसो उपाय वतावें हैं, अनुग्रहसूं भयो प्रेमरूप वीज जव दृढ होय जाय, तापीछें भक्तिमार्गीयसाधननसूं, अन्य साधनको त्याग कर वेसूं, तथा श्रवण स्मरण कीर्तनादि करवेसूं, भक्ति प्रवृद्ध होय है।

कठि० समास—वीजरूपो भावः वीजभावः। श्रवणकीर्तनयोः समाहारः तस्मात्। १।

वीजदार्ढ्यप्रकारस्तु गृहे स्थित्वा स्वधर्मतः।
अव्यावृत्तो भजेत्कृष्णं पूजया[1] श्रवणादिभिः। २।

अन्वय—वीजदार्ढ्यप्रकारः तु गृहे स्थित्वा स्वधर्मतः अव्यावृत्तः (सन्) पूजया श्रवणादिभिः कृष्णं भजेत्।

भावार्थ—प्रेमरूपवीजके दृढ होयवेको प्रकारतो येहे के, गृहस्थाश्रममें रहकें अपने वर्णाश्रमप्रयुक्त धर्मनकूं साधन करतो,

---

१–पूजां दधुर्विरचितां प्रणयावलोकैरिति समाधिभाषा।

पूजासूं (प्रेमपूर्वक दर्शन करते सेवा करनो) और श्रवण कीर्त-नादिकनसूं श्रीकृष्णकी तनुजा वित्तजा सेवा करै ।

क० समा०—दृढस्य भावः दार्ढ्यं, वीजस्य दार्ढ्यं वीजदार्ढ्यं, तस्य प्रकारः । न व्यावृत्तः अव्यावृत्तः । २ ।

व्यावृत्तोऽपि हरौ चित्तं श्रवणादौ यतेत्सदा ।
ततः प्रेम तथाऽऽसक्तिर्व्यसनं च यदा भवेत् । ३ ।
वीजं तदुच्यते शास्त्रे दृढं यन्नाऽपि नश्यति ।

अन्वय—व्यावृत्तः अपि हरौ चित्तं (आसज्य) श्रवणादौ सदा यतेत्, ततः प्रेम आसक्तिः च व्यसनं यदा भवेत् (तर्हि) तत् शास्त्रे दृढं वीजं उच्यते, यत् न अपि नश्यति ।

भावार्थ—कदाचित् अशक्तिआदि होयवेसूं जो वर्णाश्रमधर्म न वनसकते हौंय तोभी श्रीहरिमें चित्तकूं लगायकें श्रवणकीर्त-नादिक करवेमें सदा यत्न करे, तेसें करवेसूं श्रीहरिमें प्रेम, आसक्ति, और व्यसन, जव हौंय तो वे सव होनोही शास्त्रमें दृढ वीजभाव कह्यो है, जो वीजभाव दुःसंगादि अथवा काला-दिकनके वलसूंभी नष्ट नहीं होय है । ३ ।

स्नेहाद्रागविनाशः स्यादासक्त्या स्याद्गृहारुचिः । ४ ।
गृहस्थानां वाधकत्वमनात्मत्वं च भासते ।
यदास्याद्व्यसनं कृष्णे कृतार्थः स्यात्तदैव हि । ५ ।

अन्वय—स्नेहात् रागविनाशः स्यात्, आसक्त्या गृहारुचिः स्यात्, गृहस्थानां (पदार्थानां) वाधकत्वं 'च' अनात्मत्वं भासते,

---

१–अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम् ।

यदा कृष्णे व्यसनं तदा एव (भक्तः) कृतार्थः स्यात्, (इति) हि।

भावार्थ—प्रभुमें प्रीति होयवेसूं अन्यत्र जगद्वर्तीपदार्थनमें भयेस्नेहको नाश होय है, और प्रभुमें आसक्ति होयवेसूं गृहादिकमें अरुचि होय जाय है और ताहीसूं गृहवर्ती सर्व पदार्थ 'प्रभुप्रीतिके नाशकरवेवारे हैं' तथा 'प्रभुसंबंधी नहीं हैं' ऐसें दीखवे लगें हैं, जब श्रीहरिमें आसक्तिहोतें होतें व्यसन होय जाय है तब ही भक्त कृतार्थ कृतकृत्य कह्यो जाय है, यह निश्चय है। ४-५।

तादृशस्याऽपि सततं गृहस्थानं विनाशकम्।
त्यागं कृत्वा यतेद्यस्तु तदर्थार्थैकमानसः। ६।
लभेत सुदृढां भक्तिं सर्वतोप्यधिकां पराम्।

अन्वय—तादृशस्य अपि गृहस्थानं विनाशकं, (तस्मात्) त्यागं कृत्वा तु यः तदर्थार्थैकमानसः (सन्) यतेत्, (सः) सुदृढां सर्वतः अपि अधिकां परां भक्तिं लभेत।

भावार्थ—कृतार्थभये अर्थात् प्रभुकेसाक्षात्संबंधवारे भक्तको घरमें रहनो प्रभुस्नेहकूं मिटायवे वारो है, तासूं गृहादिको त्यागकरकें जो भक्त, फलरूपाभक्तिकेभी फलरूपश्रीकृष्णमें मनकूं दृढलगातो भयो यत्न करै तो वह बडीगाढी तथा चारोंतरहकी मुक्तिनसूंभी अधिक फलरूपाभक्तिकूं प्राप्त होय।

कठि० समा०—सएव अर्थो यस्याः सा तदर्था, तस्याः अर्थः तदर्थार्थः, तदर्थार्थे एकं मानसं यस्य सः तदर्थार्थैकमानसः। ६।

त्यागे बाधकभूयस्त्वं दुःसंसर्गात्तथान्नतः। ७।
अतः स्थेयं हरिस्थाने तदीयैः सह तत्परैः।
अदूरे विप्रकर्षे वा यथा चित्तं न दुष्यति। ८।

अन्वय—त्यागे दुःसंसर्गात् तथा अन्नतः बाधकभूयस्त्वं, अतः हरिस्थाने तत्परैः तदीयैः सह स्थेयं, (किंवा) अदूरे वा विप्रकर्षे (स्थेयं) यथा चित्तं न दुष्यति ।

भावार्थ—असांप्रदायिक त्यागकरवेमें अदृष्टादिसूंभये दुःसंग तथा असमर्पित आदि अन्नसूं, वेसे प्रभुप्रेमहोयवेमें वहोतसे प्रतिबंध होयवेकी संभावना है, तासूं जहां निरंतर सेवाप्रवाह चलतो होय ऐसे पवित्र वैष्णवतीर्थनमें हरिसेवातत्परभगवदीयनके संग रहै, यदि ऐसें रहवेमेंभी अभिमानादिसूं चित्तमें कोईतरहको दोष आतो होय, तो वहांही अलग पासमें अथवा अति दूर रहै, जासूं चित्त दुष्ट न होय ।

कठि० समास—भूयसः भावः भूयस्त्वं, बाधकानां भूयस्त्वं बाधकभूयस्त्वम् । तस्मिन् पराः, तत्पराः, तैः । ७-८ ।

सेवायां वा कथायां वा यस्याऽऽसक्तिर्दृढा भवेत् ।
यावज्जीवं तस्य नाशो न क्वाऽपीति मे मतिः । ९ ।

अन्वय—यस्य सेवायां वा कथायां वा दृढा आसक्तिः यावज्जीवं भवेत्, तस्य नाशः क्व अपि न (स्यात्) इति मे मतिः (अस्ति) ।

भावार्थ—जा भक्तकी प्रभुसेवामें अथवा प्रभुचरित्रकथामें दृढ आसक्ति जीवनपर्यन्त होय तो वाभक्तको कोईभीदेश अथवा कालमें नाश नहीं होय है, यह मेरी (श्रीवल्लभाचार्यजीकी) बुद्धि है ।

कठि० समास—जीवनं जीवः, यावत् जीवः यावज्जीवम् । ९ ।

बाधसंभावनायां तु नैकान्ते वास इष्यते ।
हरिस्तु सर्वतो रक्षां करिष्यति न संशयः । १० ।

अन्वय—बाधसंभावनायां तु एकान्ते वासः न इष्यते, तु हरिः सर्वतः रक्षां करिष्यति (तत्र) न संशयः (अस्ति) ।

भावार्थ—गृहादिछोडकें हरिस्थानमें रहवेमें यदि कोईतरहसूं प्रभुप्रेममें प्रतिबंध मालुम पडतो होय तो एकान्तमें वास नहीं करनो चहिये, गृहादिमें रहवेसूं अनेक विघ्न पडेंगे ऐसो तर्कभी युक्त नहीं है, क्योंके सर्वदुःखदूरकरवेवारे श्रीकृष्णही अपनेभक्तनकी सबतरहसूं रक्षा करेंगे, यामें कछु संदेह नहीं है । १० ।

इत्येवं भगवच्छास्त्रं गूढतत्वं निरूपितम् ।
य एतत्समधीयेत तस्यापि स्याद्दृढा रतिः । ११ ।

। इति श्रीमद्वल्लभाचार्यविरचिता भक्तिवर्द्धिनी सम्पूर्णा ।

अन्वय—इत्येवं गूढतत्वं भगवच्छास्त्रं (मया) निरूपितं, यः एतत् समधीयेत तस्य अपि (हरौ) दृढा रतिः स्यात् ।

भावार्थ—या रीतिसूं दुर्लभ है सार जाको ऐसो ये हरिशास्त्र मैंने कह्यो, जोकोई याको अभ्यास करै, वाकीभी श्रीहरिमें गाढीप्रीति होय है ।

कठि० समास—गूढं तत्वं यस्य तत् गूढतत्वम् । ११ ।

। इति श्रीभक्तिवर्द्धिनीव्रजभाषा सम्पूर्णा ।

व्रजभाषामें

जलभेदकी टीका।

नमस्कृत्य हरिं वक्ष्ये तद्गुणानां विभेदकान्।
भावान्विंशतिधा भिन्नान्सर्वसंदेहवारकान्। १।

अन्वय—हरिं नमस्कृत्य तद्गुणानां विभेदकान् विंशतिधा भिन्नान् सर्वसंदेहवारकान् भावान् वक्ष्ये।

भावार्थ—श्रीहरिकूं नमस्कार करकें श्रीहरिके गुणनकूं जुदे २ दिखावनारे, और वीस प्रकारसूं न्यारे २, तथा फलसाधनादिके सर्वसन्देहनकों दूर करवे वारे, ऐसे जीवनके भावन (मनोविकार) कूं में कहूंगो।

कठि० समास—तस्य गुणाः, तद्गुणाः, तान्। सर्वे च ते सन्देहाश्च, तेषां वारकाः तान्। १।

गुणभेदास्तु तावन्तो यावन्तो हि जले मताः।

अन्वय—यावन्तः (भेदाः) जले मताः तावन्तः तु गुणभेदाः (सन्ति) हि।

भावार्थ—'कूप्याभ्यः स्वाहा कुल्याभ्यः स्वाहा' इत्यादि तैत्तिरीयसंहितामें जितनेभेद जलमें कहेहैं, उतनेही श्रीहरिके गुणनके भेदहें यह निश्चय है।

गायकाः कूपसंकाशा गंधर्वा इति विश्रुताः। २।
कूपभेदास्तु यावन्तस्तावन्तस्तेऽपि संमताः।

अन्वय—गंधर्वा इति विश्रुताः गायकाः कूपसंकाशाः, यावन्तः कूपभेदाः तावन्तः ते अपि संमताः ।

भावार्थ—गंधर्व नामसों शास्त्रमें प्रसिद्ध जो हरिगुण गायक हें वे कूपकी तरह समझने, जितने उत्तममध्यमादिभेदसूं कूपनके भेद हैं, तैसे ही उत्तममध्यमादि तथा भक्त अभक्त आदिभेदनसों गायकनकेभी अनेकभेद हैं ।

कठि० समास—कूपैः संकाशाः कूपसंकाशाः । कूपानां भेदाः । २ ।

कुल्याः पौराणिकाः प्रोक्ताः पारंपर्ययुता भुवि । ३ ।
क्षेत्रप्रविष्टास्ते चाऽपि संसारोत्पत्तिहेतवः ।

अन्वय—भुवि पारंपर्ययुताः पौराणिकाः कुल्याः प्रोक्ताः, ते च अपि (यदि) क्षेत्र प्रविष्टाः (तर्हि) संसारोत्पत्तिहेतवः ।

भावार्थ—भूतलपें परंपरायुक्त जो हरिगुणगायक पौराणिक हें वे नहर समझने, अर्थात् जैसे नहरनको जल स्नानपानादिके उपयोगमें आवे हैं तैसेही पौराणिकनके भावकोभी हरिभक्तिमें उपयोग होय है, परन्तु जो कदाचित् वे और गंधर्व नहरकीतरह क्षेत्रमें अर्थात् स्त्री और शरीरआदिमें आसक्त होय जांय तो वे केवल अहंताममता करायवेवारे हैं,

कठि० समास०—पुराणं विदन्ति ते । परंपरायाः भावः पारंपर्यम्, तेन युताः । ३ ।

वेश्यादिसहिता मत्ता गायका गर्तसंज्ञिताः । ४ ।
जलार्थमेव गर्तास्तु नीचा गानोपजीविनः ।

अन्वय—वेश्यादिसहिताः मत्ताः गायकाः गर्तसंज्ञिताः किंच नीचाः गानोपजीविनः तु जलार्थमेव गर्ताः ।

